नि. सं. ग.

नं- ४९

# शिव कवच

६७८/स्तो. ४५७

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.
" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(१)

॥ शिवकवच समाप्तं ॥ राम ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(२)

शि० क० १ श्रीगणेशायनमः श्रीसांवसदाशिवायनमः हरिःॐ अ
थध्यानं वज्रदंष्ट्रं त्रिनयनं कालकंठमरिंदमं सहस्रक
रमत्युग्रं वंदे देवं सदाशिवं २ अथापरं सर्वपुराणगुह्यं निः
शेषपापौघहरं पवित्रं जयप्रदं सर्वविपत्तिमोचनं वक्ष्या
मि शैवं कवचं हिताय ते २ ऋषभउवाच नमस्कृत्वाम
हादेवं सर्वव्यापिनमीश्वरं वक्ष्ये शिवमयं वर्मसर्वरक्षा
करंनृणां १ शुचौदेशेसमासीनो यथावत्कल्पितासनः
जितेंद्रियोजितप्राणश्चिंतयेच्छिवमव्ययं २ हृत्पुंडरी
कांतरसंनिविष्टं स्वतेजसाव्याप्तनभोवकाशं अतींद्रि १

Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

यं सूक्ष्ममनंतमाद्यं ध्यायेत्सदानंदमयं महेशं ३ ध्याना
वधूताखिलकर्मबंधश्चिरं चिदानंदनिमग्नचेताः ष
ता २ डक्षरं न्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षां ४ मां
पातु देवोखिलदेवतात्मा संसारकूपे पतितं गभीरे तं
न्नाम दिव्यं वरमंत्रमूलं धुनोतु मे सर्वमघं हृदिस्थं ५
सर्वत्र मां रक्षतु विश्वमूर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा
अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषा
त ६ यो भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशो

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(31

शि० क० ष्टमूर्तिः योपांस्वरूपेण नृणांकरोतिसंजीवनंसोवतुमांजलेभ्यः
२ ७ कल्पावसानेभुवनानिदग्ध्वासर्वाणियोनृत्यतिभूरिलीलः
सकालरुद्रोवतुमांदवाग्नेर्वात्यादिभीतेरखिलाच्चतापात्
८ प्रदीप्तविद्युत्कनकावभासोविद्यावराभीतिकुठारपाणिः
चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यांदिशोरक्षतुमामजस्रं
२३ ९ कुठारवेदांकुशपाशशूलकपालढक्काक्षगुणान्दधानः च
तुर्मुखोनीलरुचिस्त्रिनेत्रः पायादघोरोदिशिदक्षिणस्यां
१० कुंदेंदुशंखस्फटिकावभासोवेदाक्षमालावरदाभयंकः २

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

त्र्यक्षश्चतुर्वक्त्रउरुप्रभावः सद्योधिजातोवतुमाप्रतीच्यां ११
वराक्षमालाभयटंकहस्तः सरोजकिंजल्कसमानवर्णः त्रि
लोचनश्चारुचतुर्मुखोमां पायादुदीच्यां दिशिवामदेवः १२ वे
दाभयेष्टांकुशपाशटंककपालढक्काक्षकशूलपाणिः सि
तद्युतिः पंचमुखोवतान्मामीशान ऊर्ध्वं परमप्रकाशः १३
मूर्धानमव्यान्ममचंद्रमौलि भालं ममाव्यादथ भालनेत्रः
नेत्रेममाव्याद्भगनेत्रहारी नासांसदारक्षतु विश्वनाथः
१४ पायाच्छ्रुतीमेश्रुतगीतकीर्तिः कपोलमव्यात्सततं कपा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

शि० क ली वक्त्रं सदा रक्षतु पंचवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः १५
३ कंठं गिरिशोवतु नीलकंठः पाणिद्वयं पातु पिनाकपाणिः दो
र्मूलमव्यान्मम धर्मबाहुर्वक्षस्थलं दक्षमखांतकोव्यात् १६
ममोदरं पातु गिरींद्रधन्वा मध्यं ममाव्यान्मदनांतकारी है
हेरंबतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे १७
उरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीश्वरो व्यात् जंघा
युगं पुंगवकेतुरव्या पादो ममाव्यात्सुरवंद्यपादः १८ म
हेश्वरः पातु दिनादियामे मां मध्ययामे वतु वामदेवः त्रि २

(4A)

यंबकः पातुत्रितीययामेवृषध्वजः पातुदिनांतयामे १९
पायान्निशादौ शशिशेखरोमां गंगाधरोरक्षतुमांनिशी
थे गौरीपतिः पातुनिशावसाने मृत्युंजयोरक्षतुसार्वका
लं २० अंतस्थितंरक्षतुशंकरोमांस्थाणुःसदापातु
बहिस्थितौमां तदंतरेपातुपतिःपशूनांसदाशिवो
रक्षतुमांसमंतात् २१ तिष्ठंतमव्याद्भुवनैकनाथःपा
याद्व्रजंतंप्रमथादिनाथः वेदांतवेद्योवतुमांनिषण्णंम
माव्ययःपातुशिवःशयानं २२ मार्गेषुमांरक्षतुनीलकं

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(5)

त्रि० क० ठः शैलादिदुर्गेषु पुरत्रयारिः अरण्यवासादिमहाप्रवासे
४ पायान्मृगव्याधउदारशक्तिः २३ कल्पांतकाटोपपटु
प्रकोपस्फुटाट्टहासोच्चलितांडकोशः घोरारिसेनार्ण
वदुर्निवारमहाभयाद्रक्षतु वीरभद्रः २४ पत्यश्वमातंग
घटावरूथसहस्रलक्षाग्रकोटिभीषणं अक्षौहिणी
नांशतमाततायिनां छिंद्यान्मृडो घोरकुठारधारया २५
निर्हंति दस्यून्प्रलयानलार्चिर्ज्वलत्रिशूलं त्रिपुरांतकस्य
शार्दूलसिंहर्क्षवृकादिहिंस्रासंत्रासयत्वीशधनुःपिना ४

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

कः २६ दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्य दुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि उत्पाततापविषभीतिमसद्ग्रहार्ति व्याधींश्च नाशयतु मे जगतामधीशः २७ ॐ नमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सकलतत्त्वविहाराय सकललोकैककर्त्रे सकललोकैकभर्त्रे सकललोकैकहर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनिगमगुह्याय सकलवरप्रदाय सकलदुरितार्तिभंजनाय सकलजगदभयंकराय सकललोकैकशंकराय शशांकशेखर

Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(61)

शि० क० राय शाश्वतनिजवासाय निर्गुणाय निरूपाय निराभासाय

५ निःप्रपंचाय निष्कलंकाय निर्द्वंद्वाय निःसंगाय निर्मलाय नि

रूपमविभवाय निराधाराय नित्यशुद्धपरिपूर्णसच्चिदानं

दाद्वयपरमशांतप्रकाशतेजोरूपाय जयजय महारुद्रम

हारौद्रभद्रावतार महाभैरवकालभैरवकपालभैरवकालभैरवकपा

लमालाधरखट्वांगखड्गचर्मपाशांकुशडमरुशूलचापबाण

गदाशक्तिभिंदिमालातोमरमुसलमुद्गरप्रासपट्टिशपरशु

परिघभुशुंडीशतघ्नीचक्राद्यायुधभीषणकरसहस्रमुखदं ५

(6A)

ष्ट्राकलालविकटाट्टहासविस्फारितब्रह्मांडमंडलनागेंद्रकुंड
लनागेंद्रवलयनागेंद्रहारनागेंद्रचर्मांबरधरमृत्युंजयत्र्यं
बकत्रिपुरांतकविरूपाक्षविश्वेश्वरविश्वरूपवृषभवाहनविष
भूषणविश्वतोमुखसर्वतोरक्षमांज्वलज्ज्वलमहामृत्युभ
यंनाशयनाशयरोगभयमुत्सादयोत्सादयविषसर्पभयंशम
यशमयचोरान्मारयमारयममशत्रूनुच्चाटयोच्चाटयत्रिशू
लेनविदारयविदारयकुठारेणभिंधिभिंधिखड्गेनछिंधिछिं
धिखट्वांगेनविपोथयविपोथयमुसलेननिष्पेषयनिष्पे

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the

(7)

शि०क० ५

५

षय बाणैः संताडय संताडय रक्षांसि भीषय भीषय भूतानि
विद्रावय विद्रावय कूष्मांडवेताळमारीगण ब्रह्मराक्षसा
न्संत्रासय संत्रासय मामभयं कुरु कुरु वित्रस्तं मामाश्वा
सयाश्वासय नरकभयान्मामुद्धरोद्धर संजीवय संजीवय
क्षुत्तृड्भ्यां मामाप्यायाप्यायय दुःखातुरमानंदयानंद
य शिवकवचेन मामाछादयाछादय त्र्यंबक नमस्ते न
मस्ते ऋषभ उवाच इत्येतत्कवचं शैवं वरदं व्याहृतं म
या सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनां २८ यः सदा ५

(7A)

धारयेन्मर्त्यः शैवं कवचमुत्तमं नतस्य जायते क्वापि भयं
शंभोरनुग्रहात् २९ क्षीणायुःप्राप्तमृत्युर्वा महारोगहतो
पि वा सद्यः सुखमवाप्नोति दीर्घमायुश्च विंदति ३० सर्व
दारिद्र्यशमनं सौमंगल्यविवर्धनं योधीते कवचं शैवं स
देवैरपि पूज्यते ३१ महापातकसंघातैर्मुच्यते चोपपा
तकैः देहांते मुक्तिमाप्नोति शिववर्मानुभावतः ३२ त्व
मपि श्रद्धया वत्स शैवं कवचमुत्तमं धारयस्व मया दत्तं
सद्यः श्रेयो ह्यवाप्स्यसि ३३ सूत उवाच इत्युक्त्वा

Sole project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8)

शि॰क॰ ७

ऋषभोयोगीतस्मैपार्थिवसूनवे ददौशंखंमहानादंख
ड्गंचारिनिषूदनं ३४ पुनश्चमंत्रसंमंत्र्यतदंगंपरितोऽस्पृ
शत् गजानांषट्सहस्रस्यत्रिगुणस्यबलंददौ ३५ भ
स्मप्रभावात्संप्राप्यबलै[illegible]तिस्मृतिः सराजपुत्रःशु
शुभेशारदर्कइवश्रिया ३६ तमाहप्रांजलिंभूयःसयो
गीनृपनंदनं एषखड्गोमयादत्तस्तपोमंत्रानुभावतः ३७
शितधारमिमंखड्गं यस्मैदर्शयसेस्फुटं ससद्योम्रियते
शत्रुःसाक्षान्मृत्युरपिस्वयं ३८ अस्यशंखस्यनिर्ह्रादं ७

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(8A)

येभ्यण्वंतित्तवाहिता: नेमरछिंना: पतिष्यंतिन्यस्तशस्त्रा
श्विचेतनः ३९ खड्ग शंखाविमौ दिव्यौ परसेनन्यविमर्दनौ
आत्मसैन्यस्वपक्षाणां शौर्यतेजोविवर्धनौ ४० एतयोश्च
प्रभावेन शैवेनकवचेन च द्विषसदुस्त्रनागानां बलेन महता पिच्च ४१ भस्मधारणसामर्थ्याच्छत्रुसैन्यं विजेष्यसि
प्राप्यसिंहासनं पित्र्यं गोप्तासि पृथिवीमिमां ४२ इति
भद्रायषं सम्यगनुशास्यसमातृकं ताभ्यां संपूजितः सो
थयोगीः स्वैरगतिर्ययौ ४३ इतिश्रीस्कंदपुराणे ब्रह्मोत्तर

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(१)

शि० क० खंडे शिववर्मकथनंनाम द्वादशोध्यायः श्रीसांबसदाशि
८ वार्पणमस्तु इदं पुस्तकं नोने इत्युपनामक नारायणेन शके
१७७७
विश्वावसु नामसंवत्सरे आषाढमासे कृष्णपक्षे एकादश्यां
तिथौ भौमवासरे तद्दिने लिखितं समाप्तं इदं पुस्तकं सिद्ध
ये उपनामक जगंनाथ पंतस्य ॥ ७ ॥ ७ ॥ ७ ॥

८

Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10)

शि० क

१

॥ इतिशिवकवच समाप्तः॥

१

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com